**शिक्षा निदेशालय, राष्ट्रीय राजधानी क्षेत्र दिल्ली**
**अभ्यासप्रश्नपत्रम् (सत्रम्– 2023-24)**

**कक्षा - दशमी** **संस्कृतम् (कोड-122)**
**अवधिः– होरात्रयम्** **सम्पूर्णाङ्काः – 80**

**सामान्यनिर्देशाः-**
(i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
(ii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
(iii) प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
(iv) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
(v) प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

**प्रश्नपत्रस्वरूपम्-**

| | | |
|---|---|---|
| खण्डः- क | अपठितांश – अवबोधनम् | 10 अङ्काः |
| खण्डः- ख | रचनात्मककार्यम् | 15 अङ्काः |
| खण्डः- ग | अनुप्रयुक्तव्याकरणम् | 25 अङ्काः |
| खण्डः- घ | पठित-अवबोधनम् | 30 अङ्काः |

**खण्डः- क**
**अपठितांश – अवबोधनम्** **10 अङ्काः**

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**
ये जनाः दृढप्रतिज्ञाः भवन्ति तेषां कृते तेषां व्रतमेव सर्वप्रमुखं भवति। संसारे ईदृशाः जनाः अभवन् ये जीवनस्य अन्तिमे क्षणेऽपि सत्यस्य आश्रयं नात्यजन्। स्वात्मनः विपर्यये किञ्चिद् कर्म अपि नाकुर्वन्। अनेकासु विपत्तिषु अपि नृपः हरिश्चन्द्रः सत्यस्याश्रयं नात्यजत्। महाराणा प्रतापः आजीवनं वने वनेऽभ्रमत्। स्वभार्यां बालौ च बुभुक्षया निष्प्राणानिव पश्यन्नपि स: तेषां वार्तां न अमन्यत। महाराणा प्रतापस्य पत्नी पुत्रौ च तस्मै पराधीनं जीवनं जीवितुम् अकथयन्। आधुनिके काले महर्षिः दयानन्दोऽपि सत्यस्य पालने वेदप्रचारे च स्वजीवनस्य बलिदानम् अकरोत् परं सत्यस्य मार्गं नात्यजत्। एवमेव पुण्यभूमिभारते अनेके ईदृशाः महापुरुषाः अजायन्त, ये स्वजन्मना इमां भूमिं पवित्राम् अकुर्वन्। अद्यापि तेषां चरणचिह्नानि मानवान् सत्याचरणं प्रति प्रेरयन्ति।

**अ. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)** **1x2=2**
(i) महर्षिः दयानन्दः किं बलिदानम् अकरोत्?
(ii) कः नृपः सत्यस्य आश्रयं नात्यजत्?
(iii) कः आजीवनं वने वनेऽभ्रमत्?



DoE, Delhi

**आ. पूर्णवाक्येन लिखत- (केवलं प्रश्नद्वयम्)** **2x2=4**

(i) दृढप्रतिज्ञजनानां कृते किं सर्वप्रमुखं भवति?

(ii) अद्यापि किं मानवान् सत्याचरणं प्रति प्रेरयन्ति?

(iii) के महाराणा- प्रतापं पराधीनं जीवनं जीवितुम् अकथयन्?

**इ.) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** **1**

**ई.) यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्)**

**1x3=3**

**(i) 'अकरोत्' इत्यस्याः क्रियायाः कर्तृपदं किम्?**

(क) महर्षि दयानन्दः (ख) महाराणा (ग) हरिश्चन्द्रः

**(ii) 'नृपः हरिश्चन्द्रः' अनयोः पदयोः विशेषणं किम् ?**

(क) हरिश्चन्द्रः (ख) नृपः (ग) नृपः हरिश्चन्द्रः

**(iii) 'पत्नीम्' इत्यस्य पदस्य कः पर्यायः अत्र आगतः ?**

(क) नृपः (ख) भार्याम् (ग) जायाम्

**(iv) अनुच्छेदे 'मिथ्यायाः' पदस्य कः विपर्ययः आगतः ?**

(क) सत्यस्य (ख) असत्यस्य (ग) वार्ताम्

**खण्डः ख**

**रचनात्मककार्यम्** **15 अङ्काः**

**2. भवत्याः नाम विद्योत्तमा अस्ति। भवत्याः विद्यालये पर्यावरणदिवसःमानितः। एतद्-विषये |स्वसखीम् अस्मितां प्रति लिखिते पत्रे रिक्तस्थानानि पूरयित्वा पत्रं च पुनः उत्तरपुस्तिकायां लिखतु । ½x10-5**

परीक्षाभवनात्

दिनाङ्कः ………………

प्रिये (i)………………

………………(ii) नमस्ते।

ह्यः एव मम विद्यालये (iii) ………………मानितः। सर्वे छात्राः (iv) ……………… आसन्। छात्राः अध्यापकैः सह पादपानाम् (v)……………… व्यस्ताः आसन्। मम विद्यालयस्य परिसरे तु (vi)……………… प्रसृतः। एकादश-द्वादशकक्षायाः छात्राः विद्यालयात् बहिः गत्वा (vii)………………



DoE, Delhi
https://www.evidyarthi.in

उभयतः पादपान् (viii)................. । सर्वे जनाः अस्माकं विद्यालयस्य छात्राणां प्रयासस्य (ix)................. कृतवन्तः। यदि सर्वे विद्यालयाः एवं कुर्युः तर्हि (x)................. रक्षणं स्यात्।

भवदीया अभिन्ना सखी
विद्योत्तमा

**मञ्जूषा**

| |
|---|
| हरितिमा, उत्साहिता, प्रशंसाम्, आरोपितवन्तः, अस्मिते!, मार्गम्, आरोपणे, सस्नेहम्, पर्यावरणदिवसः, वातावरणस्य |

**3. प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत- 1x5=5**





**मञ्जूषा**

| |
|---|
| **भारतस्य, जनाः, निर्वाचन–आयोगः, बालिकाः, बालकाः अष्टादशवर्षीयाः, निर्वाचन–पेटिकां, पिञ्जं, नुदन्ति, हरितं विद्युत्, मसी–पात्रम्, मसी, अङ्गुलिम् कुर्वन्ति, दर्शयन्ति, मतदातापत्रम्** |

**अथवा**

**मञ्जूषा–प्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत।**

**दूरदर्शनम्**

**मञ्जूषा**

| |
|---|
| **जनाः, पश्यन्ति, दूरदर्शनं, समाचाराः, समसामयिक्यः, घटनाः, देशविदेशस्य, मनोरञ्जनं, ज्ञानविज्ञानं, विद्वासः, समाचारवाचकाः, दर्शकाः, ज्ञान–विज्ञानम्** |

**4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत– (केवलं वाक्यपञ्चकम् ) 1x5=5**

| | | |
|---|---|---|
| **I.** | **चिकित्सालय के चारों ओर मार्ग हैं** | **(a) Roads are surrounding the hospital.** |
| **II.** | **तुम माँ के साथ रसोई में काम करती हो।** | **(b)You work with your mother in the kitchen.** |
| **III.** | **राधा ने भोजन किया।** | **(c) Radha had food.** |
| **IV.** | **कल गणतन्त्र दिवस था।** | **(d) Yesterday was republic day.** |
| **V.** | **यमुना नदी दिल्ली में बहती है।** | **(e) The Yamuna river flows in Delhi** |
| **VI.** | **सदा सच बोलो** | **(f) Always speak the truth.** |

## 'ग'-खण्ड:

**अनुप्रयुक्त-व्याकरणम् 25 अङ्का:**

**5. अधोलिखितेषु वाक्येषु रेखांकितपदस्य सन्धिपदं सन्धिच्छेदपदं वा लिखत (केवलं प्रश्नचतुष्टयम्) 1x4=4**

(i) एकान्ते कान्तारे क्षणमपि मे स्यात् सञ्चरणम्।

(ii) सकलैः विद्यार्थिभिः समयस्य सदुपयोगः करणीयः।

(iii) कश्चित् उद्दण्डः बालकः भ्रमन्नासीत्।

(iv) कञ्चित्कालं नय माम् अस्मान्नगरात् बहुदूरम्' ।

(v) अश्वः+चेद् धावने वीरः।

**6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चिनुत- (केवलं प्रश्नचतुष्टयम्) 1x4=4**

(i) अयि चल बन्धो! **खगकुलकलरव** गुञ्जितवनदेशम्।

(क) खगकुलानां कलरव: (ख) खगकुल कलरव: (ग) खगकुलानि कलरव:

(ii) पुर-कलरव सम्भ्रमितजनेभ्यो **धृतसुखसन्देशम्**।

(क) धृतः सुखसन्देशः येन सः, तम् (ख) धृतः सुखसन्देशः यं सः, तम् (ग) धृतः सुखसन्देशः यः सः, तम् (घ) धृतं सुखसन्देशः यः सः, तम्

(iii) **प्रस्तरस्य तले** लतातरुगुल्मा नो भवन्तु पिष्टाः।

(क) प्रस्तरतले (ख) प्रस्तरस्तलम् (ग) प्रस्तरस्यतले (घ ) प्रस्तरं तलम्

(iv) प्रस्तरतले **लतातरुगुल्मा** नो भवन्तु पिष्टाः।

(क) लताः तरवः गुल्मा: च (ख) लताः च तरुगुल्मा: (ग) लताः च तरवः च गुल्मा: च (घ) लताः तरवः गुल्मा: येषां



https://www.evidyarthi.in

(iv) **मानवाय जीवनं** कामये नो जीवन्मरणम्।

(क) मानवजीवनम् (ख) जीवनमानवस्य (ग) मानवजीवनाय (घ) मानवजीवनाय

**7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चिनुत- (केवलं प्रश्नचतुष्टयम्) 1x4=4**

(i) **हरिततरूणां ललितलतानां माला रमणीया।**

(क) रमण+ईया (ख) रमणीय+टाप् (ग) रमणीय+ता

(ii) **वाष्पयानमाला सन्धावति वितरन्ती ध्वानम्।**

(क) वितरत्+ङीप् (ख) वितरन्+ङीप् (ग) वितरन्त्+ङीष्

(iii) **कुसुमावलिः समीरचालिता स्यान्मे वरणीया।**

(क) चल्+टाप् (ख) चालित+टाप् (ग) चालि+ता

(iv) राजसिंह: **बुद्धिमान्** राजपुत्र: आसीत्।

(क) बुद्धि+वतुप् (ख) बुद्धि+मान् (ग) बुद्धि+मतुप्

(v) **तपोवनवासिनः देवी इति नाम्ना आह्वयन्ति।**

(क) देव+टाप् (ख) देव+ङीप् (ग) देव+णिनि

**8. वाच्यानुसारं उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं विकल्पेन पूरयत। (केवलं प्रश्नत्रयम्) 1x3=3**

(i) निखिलः – आदित्य! किं त्वया ------------पठ्यते?

(क) गीताम् (ख) गीता (ग) गीतान्

(ii) आदित्यः- न, अहं तु स्वपाठं------------।

(क) पठ्यते (ख) पठामि (ग) पठ्यसे

(iii) निखिलः – शोभनम्! त्वं कदा गीतां-------?

(क) पठ्यते (ख) पठ्ये (ग) पठसि

(iv) आदित्यः –---------- तु प्रातःकाले एव गीताश्लोकानाम् अभ्यासः क्रियते।

(क) त्वया (ख) अहम् (ग) मया

**9. प्रदत्तेभ्यः रिक्तस्थानेभ्यः समुचितं कालबोधकशब्दं लिखत - (केवलं प्रश्नचतुष्टयम्) 1x4=4**

(i) अहं दिवायां **(12:30)** ------------- भोजनं करोमि।

(ii) जाह्नवी सायं **(5:30)** ------------ खेलनाय गच्छति।

(iii) सुनीतिः प्रातः **(6:30)** ------------ योगासनं करोति।

(iv) सायं **(5:00)** -------------- अभिषेकः संगीतकक्षायै गच्छति।



DoE, Delhi

(v) निकुञ्जस्य पितामहः **(1:45)** ---------- शयनं करोति।

**10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत - (केवलं प्रश्नत्रयम्) 1x3=3**

(i) कोऽपि न जानाति---------कस्य किं भविष्यति।

(ii) आरक्षी---------उच्चैः अहसत्।

(iii) ----------एका मञ्जूषा आसीत्।

(iv) ग्रामस्य आरक्षी ----------- आसीत्?

**मञ्जूषा**

| |
|---|
| कुत्र, च, श्वः, तत्र |

**11. अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। शुद्ध पदं विकल्पेभ्यः चिनुत-(केवलं प्रश्नत्रयम्) 1x3=3**

(i) त्वं चाकलेहं **खादति**।

(क) खादसि (ख) खादन्तु (ग) खादतु (घ) खादामः

(ii) सः **वृक्षाः** सिञ्चति।

(क) वृक्षान् (ख) वृक्षाः (ग) वृक्षौ (घ) वृक्षः

(iii) माता पिता च ग्रामं **आगच्छन्ति**।

(क) आगच्छसि (ख) आगच्छतः (ग) आगच्छति (घ) आगच्छामः

(iv) भवान् ह्यः कुत्र **भविष्यति।**

(क) आसीत् (ख) आस्ताम् (ग) आसन् (घ) आसः

**घ–खण्डः**

**पठितावबोधनम्**

**12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5**

कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चद् वित्तमुपार्जितवान्। तेन वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत्। एकदा स पिता तनुजस्य रुग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुं च प्रस्थितः। परमर्थकार्श्येन पीडितः स बसयानं विहाय पदातिरेव प्राचलत्। पदातिक्रमेण संचलन् सायं समयेऽप्यसौ गन्तव्याद्दूरे आसीत्। 'निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा' एवं विचार्य स पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कञ्चित् गृहस्थमुपागतः। करुणापरः गृही तस्मै आश्रयं प्रायच्छत्।



DoE, Delhi
https://www.evidyarthi.in

**(अ) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ½ x2=1**

(क) कः जनः भूरि परिश्रम्य वित्तम् उपार्जितवान्?

(ख) पिता कस्य रुग्णतामाकर्ण्य व्याकुलो जातः?

(ग) अर्थकार्श्येन पीडितः सः कं विहाय पदातिरेव प्राचलत्?

**(आ) पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) 1x2=2**

(क) निर्धनः स्वपुत्रम् कुत्र प्रवेशं दापयितुं सफलो जातः।

(ख) सः रात्रिनिवासं कर्तुं कं प्रति उपागतः?

(ग) निशान्धकारे प्रसृते कुत्र पदयात्रा न शुभावहा'।

**(इ.) यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्) 1x2=2**

(क) 'उपार्जितवान्' इत्यस्याः क्रियायाः कर्तृपदं किम्?

(ख) 'निर्धनः जनः' अनयोः पदयोः विशेषणं किम् ?

(ग) 'पुत्रः' इत्यस्य पदस्य कः पर्यायः अत्र आगतः ?

**13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5**

गुणी गुणं वेत्ति न वेत्ति निर्गुणो बली बलं वेत्ति न वेत्ति निर्बलः।
पिको वसन्तस्य गुणं न वायसः करी च सिंहस्य बलं न मूषकः॥

**अ. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) ½ x2=1**

(क ) गुणी किं वेत्ति ?

(ख) सिंहस्य बलं कः न वेत्ति?

(ग) बली किं वेत्ति?

**आ. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) 1x2=2**

(क) पिकः कस्य गुणं जानाति?

(ख) मूषकः किं न जानाति?

(ग) बलं को जानाति को वा न वेत्ति?

**इ. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्) 1x2=2**

(क) 'वेत्ति' इत्यस्याः क्रियायाः कर्तृपदं किम्?

(ख) 'सबलः' इत्यस्य पदस्य कः विपर्ययः अत्र प्रयुक्तः ?

(ग) 'हस्ती' इत्यस्य पदस्य कः पर्यायः अत्र आगतः ?

DoE, Delhi

**14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5**

सिंहः - (क्रोधेन गर्जन्) भोः! अहं वनराजः। किं भयं न जायते? किमर्थं मामेवं तुदन्ति सर्वे मिलित्वा?

एकः वानरः - यतः त्वं वनराजः भवितुं तु सर्वथाऽयोग्यः। राजा तु रक्षकः भवति परं भवान् तु भक्षकः। अपि च स्वरक्षायामपि समर्थः नासि तर्हि कथमस्मान् रक्षिष्यसि?

अन्यः वानरः- किं न श्रुता त्वया पञ्चतन्त्रोक्तिः -

**यो न रक्षति वित्रस्तान् पीड्यमानान्परैः सदा।**
**जन्तून् पार्थिवरूपेण स कृतान्तो न संशयः॥**

काकः - आम् सत्यं कथितं त्वया। वस्तुतः वनराजः भवितुं तु अहमेव योग्यः।

पिकः - (उपहसन्) कथं त्वं योग्यः वनराजः भवितुं, यत्र तत्र 'का-का' इति कर्कशध्वनिना वातावरणमाकुलीकरोषि। न रूपं न ध्वनिरस्ति। कृष्णवर्णं, मेध्यामेध्यभक्षकं त्वां कथं वनराजं मन्यामहे वयम्?

**अ. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्) ½ x2=1**

(क) कः क्रोधेन गर्जति?

(ख) क: रक्षक: भवति?

(ग) 'किमर्थं मामेवं तुदन्ति सर्वे मिलित्वा?' इति कः कथयति?

**आ. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्) 1x2=2**

(क) यः त्रस्तान् न रक्षति सः किं कथ्यते?

(ख) पिकः काकं वनराजरूपेण कथं न स्वीकरोति?

(ग) काकः किं वदति?

**इ यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्) 1x2=2**

(क) 'राजा' इत्यस्य कर्तृपदस्य क्रियापदं किम्?

(ख) 'राजा तु रक्षकः भवति परं भवान् तु भक्षकः'वाक्येऽस्मिन् अव्ययपदं किम् ?

(ग) 'कपिः' इत्यस्य पदस्य कः पर्यायः अत्र आगतः ?

**15. रेखाङ्कित-पदानि आधृत्य समुचितं प्रश्ननिर्माणं कुरुत-(केवलं प्रश्नचतुष्टयम्) 1x4=4**

(क) तनयः <u>**छात्रावासे**</u> निवसन् अध्ययने सङ्लग्नः अभूत्।

(ख) <u>**पिता**</u> पुत्राय बाल्ये विद्याधनं यच्छति।

(ग) संसारे <u>**विद्वांसः**</u> ज्ञानचक्षुभिः नेत्रवन्तः कथ्यन्ते।

(घ) चौरः <u>**गृहाभ्यन्तरं**</u> प्रविष्टः।



DoE, Delhi
https://www.evidyarthi.in

(ङ) आचारः प्रथमो धर्मः इत्येतद् **विदुषां** वचः॥

**16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयत - 1x4=4**

**पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।**
**पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता॥1॥**

**अन्वयः** - पिता (i)………….. बाल्ये महद् विद्याधनम्(ii)………… अस्य (पुत्रस्य) पिता (iii)....... तपः तेपे इत्युक्तिः(iv).......।

**मञ्जूषा-**

| |
|---|
| किम्, पुत्राय, तत्कृतज्ञता, यच्छति |

**अथवा**

**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

**विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः।**
**अन्येषां वदने ये तु ते चक्षुर्नामनी मते ॥**

**भावार्थः-** ..........संसारे (लोके) विद्वान् जनः एव......... भवति अर्थात् ज्ञानरूपिचक्षुः एव वास्तविकं नेत्रं अस्ति। .........जनस्य ज्ञानार्जने रुचिः न .............तस्य नेत्रे तु केवलं नाम्ना एव।

**मञ्जूषा-**

| |
|---|
| यस्य, नेत्रवान्, भवति, अस्मिन् |

DoE, Delhi

**17. अधोलिखित-कथांशं समुचित-क्रमेण लिखत – ½ x8=4**

(i) तेन वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः।

(ii) करुणापरो गृही तस्मै आश्रयं प्रायच्छत्।

(iii) कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्।

(iv) परमर्थकार्श्येन पीडितः स बसयानं विहाय पदातिरेव प्राचलत्।

(v) एवं विचार्य स पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कञ्चिद् गृहस्थमुपागतः।

(vi) निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा।

(vii) एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः।

(viii) पदातिक्रमेण सञ्चलन् सायं समयेऽप्यसौ गन्तव्याद् दूरे आसीत्।

**18. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसंगानुकूलम् उचितार्थं चिनुत (केवलं प्रश्नत्रयम्) 1 x3 =3**

(i) कालायसचक्रं सदा **वक्रं** भ्रमति ।

(क) चक्रं (ख) दूषितं (ग) कुटिलं

(ii) त्वं **मानुषात्** अपि विभेषि।

(क) मानवात् (ख) वानरात् (ग)अश्वात्

(iii) सा पुत्रौ चपेटिकया प्रहृत्य **जगाद** ।

(क) अधावत् (ख) अवदत् (ग) अचिन्तयत्

(iv) इदानीं वायुमण्डल **भृशं** दूषितम् अस्ति।

(क) भाग्यं (ख) स्वल्पम् (ग) अधिकम्

DoE, Delhi



https://www.evidyarthi.in